# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| **कक्षा - शास्त्रितृतीयवर्षम्** (SEM-5) | **प्रश्नपत्रम् – ४** | |
| **विषयः - संस्कृतसंम्भाषणम्** | (O.E.-3.5.5.) | **गुणाः - ७०** |
| **दिनाङ्कः - ०७/१२/२०१८** | ग्रन्थः विदुरनीतिशतकम् | **समयः -१०.०० तः ०१.००** |

**प्रथमान्वितिः**

**प्रश्नः १ अधस्तनेषु श्लोकेषु द्वयोः पदच्छेद-पदपरिचय-पदार्थान्वय-पुरःसरं व्याख्या कार्या** **( १० )**

(१) पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः ।
पिता माताग्निरात्मा च गुरुश्च भरतर्षभ ॥

(२) अकस्मादेव कुप्यन्ति प्रसीदन्त्यनिमित्ततः ।
शीलमेतदसाधूनामभ्रं पारिप्लवं यथा ॥

(३) यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे स्यात् तदाद्यं भूतिमिच्छता ॥

**प्रश्नः २** 'शान्तिः योगेन विन्द्यते', 'विध्नेभ्यः भयं कुतः' इति विषयद्वयं यथाशास्त्रं वर्णयत - **( १० )**

**( अथवा )**

'पञ्च अग्नयः', 'मानवभूषणानि' इमौ विषयौ स्व-ग्रन्थानुसारेण प्रतिपादनीयौ -

**द्वितीयान्वितिः**

**प्रश्नः ३ अधस्तनेषु द्वौ श्लोकौ पदच्छेद-पदपरिचय-पदार्थान्वयपुरःसरं व्याख्येयौ -** **( १० )**

(१) धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ॥

(२) अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत् ।
जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम् ॥

(३) नष्टं समुद्रे पतितं नष्टं वाक्यमश्रृण्वति ।
अनात्मनि श्रुतं नष्टं नष्टं हुतमनग्निकम् ॥

**प्रश्नः ४ अधस्तनेषु एकः विषय वर्णनीयः -** **( १० )**

(१) सतां लक्षणं सदाचारः ।

(२) सारं सर्वतः आदद्यात् ।

(३) जातस्य हि ध्रुवः मृत्युः ।

## तृतीयान्वितिः

**प्रश्नः ५ अधस्तनेषु द्वौ श्लोकौ पदेच्छेद-पदपरिचय-पदार्थान्वयपुरःसरं व्याख्येयौ - (१०)**

(१) चत्वारि राज्ञा तु महाबलने वर्ज्यान्याहुः पण्डितस्तानि विद्यात् ।
अल्पज्ञैः सह मन्त्रं न कुर्यात् न दीर्घसूत्रैः रभसैश्चारणैश्च ॥

(२) यथा मधु समादते रक्षन् पुष्पाणि षट्पदः ।
तद्वद् अर्थान् मनुष्येभ्यः आदद्यादविहिंसया ॥

(३) पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।
स्त्रियः श्रियः गृहस्योक्तास्तस्माद् रक्ष्या विशेषतः ॥

**प्रश्नः ६** स्व -ग्रन्थानुसारेण 'मन्त्रविप्लवः', 'भृत्यवात्सल्यम्' इमौ विषयौ सोद्धरणं विवेचनीयौ । **(१०)**

**(अथवा)**

विदुरनीतेः आधुनिकयुगेऽपि यत् प्रयोजनमस्ति, तद् प्रतिपादयत ।

## चतुर्थान्वितिः

**प्रश्नः ७ अधस्तनेषु यथेच्छं दश प्रश्नाः समाधेयाः । (१०)**

(१) विद्यायाः के त्रयः शत्रवः ?
(२) मनुष्यः केन शान्तिं विन्दति ?
(३) मूर्खः नरः कीदृशं कर्म आचरेत ?
(४) नरः कान् न अर्चयेत् ?
(५) पुरुषे किं प्रधानम् ?
(६) नित्यदुःखिताः कति ?
(७) विद्या केन रक्ष्यते ?
(८) विनयः कां हन्ति ?
(९) बालादपि किं ग्राह्यम् ?
(१०) के मृततुल्याः भवन्ति ?
(११) कः नित्यः ?
(१२) शरीरस्य नियन्ता कः ?
(१३) धर्मस्य मार्गः कतिविधः ?
(१४) विदुरनीतिशतके कति श्लोकाः ?

--००--